International Journal of Sanskrit Research 2020; 6(6): 87-89

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 87-89
© 2020 IJSR
www.anantaajournal.com
Received: 22-09-2020
Accepted: 28-10-2020

**पूजा**
शोध छात्रा, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

**Corresponding Author:**
**पूजा**
शोध छात्रा, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

# बोधिचित्तोत्पादः

## पूजा

### प्रस्तावना

बौद्धानां दार्शनिकचिन्तने तथा तस्य साधने चित्तस्य संस्कारः प्रधानं कर्म वर्तते।

> अनवट्ठितचित्तस्य सद्धमं अविजानतो।
> परिप्लवपसादस्स पञ्ञा ना परिपूरति॥[1]

तस्यां व्यक्तेः पूर्णा न भवति, अनुभवसञ्चितज्ञाने च पूर्णे न भवतः यस्य चित्तं चञ्चलं वर्तते। सद्धर्मस्य विषये यं ज्ञानं नास्ति श्रद्धा यस्य चपला वर्तते। चित्तस्यास्तिरतायाः अट्ठकथाकारस्य कानिचन् उदाहराणानि प्रस्तूयन्ते

> कदाचि बुद्धसावको होति, कदाचि अचेलको,
> कदाचि आजीवको, कदाचि निगंठो; कदाचि तापसो।
> एवरूपो पुग्गलो अनवट्ठितचित्तो नाम॥[2]

कदाचित् बुद्धस्य श्रावको भवति, कदा अचेलको भवति। कदाचित् आजीवको भवति कदा निर्ग्रन्थो भवति। कदाचित् तापसो भवति इत्येवम्प्रकारेण जनः अस्थिरचित्तो भवति। परं चित्तं स्थिरी भवति कथम्। तस्मिन् दूरं यावत् गन्तुं क्षमता वर्तते मित्रेण विनापि सतत् सर्वस्थानगामि वर्तते। यद्यपि धृतशरीरमिदं शरीरस्य गच्छेदभिविराजते। मानवशरीरस्य कन्दरायो यच्चितं सुप्तं वर्तते तस्य स्वरूपे भेदविषये च चिन्तनावसरे तस्य बोधिचित्तरूपे यः परिणामो भवति तस्मिन् विचारः अपेक्ष्यते

### बोधिचित्तस्य भेदाः

सत्यस्य शून्यस्य वा चर्चावसरे संवृतसत्यः परमार्थसत्यः च इंगितौ स्तः। ययोः जीवनगतः अजीवजगतश्च समावेशो वर्तते। द्वयोरेकः विज्ञानं द्वितीयाश्च विज्ञेयं कथ्येते। सर्वास्तिवादिनां मते द्वापि संवृतसत्यौ स्तः। शून्यवादिनां मते द्वापि संवृतिसत्यौ स्तः। साधकाय अपेक्ष्यते स्वचित्तं रागद्वेषाभ्यां पृथक्कृत्य विशेषावस्थायां प्रापणम्। अतः चित्तत्यागात् शून्यभावात् गौणवस्तुभावात् न किञ्चिदपि भवति। अथास्यै अपेक्ष्यते यत् सः चित्तस्य प्राधान्यं स्वीकृत्य

तस्य साधनां कुर्यात्। चित्तमतिरिच्य अन्येषां गौण्यभावनयापि वस्तुस्थितिर्न विपरिणमते। चित्तस्य प्राधान्यमन्येषां गौणत्वमेव विज्ञानवादो वर्तते। विज्ञानवादशब्दार्थो भवति विज्ञानं परमार्थवादः अर्थात् विज्ञानं चित्तस्य परमार्थसत्यतायाः स्वीकृतिः। विज्ञानं परमार्थसत्यं यः माति तस्य अन्यैर्विषयैः साकं को वा विशेषोऽवशिष्यते। इति प्रश्न उदेति। विज्ञानेतरवस्तुषु तथागतस्य "सब्बे धम्मा अनत्ता"[1] मतानुसारं आत्मा तथा धर्मशब्देन येषां येषां संग्रहः सम्भवति तेषां ग्रहणं कर्तव्यम्। तेषु तैर्थिकानां बौद्धेतरतत्त्ववादिनामेकः पदार्थः आत्मा वर्तते। तथा धर्मबौद्धतत्त्ववादिनामेकः पदार्थो वर्तते। यस्मिन् आत्मेतराणां सर्वेषां विषयाणां समावेशो भवति। आत्मनः धर्मस्य च वा प्राप्तिर्भवति, या लोकव्यवहारे अभिधेयेन अभिधेनेन वा भवति अयं चैको विकल्प एव। आत्मनः धर्मस्य कल्पनया विहीनः कल्पनान्तविज्ञानं मौलिकविज्ञानं वर्तते। यत् आलयशब्देन व्यवहृयते। अनेनैवालयेन संसारस्य प्रवृत्तिर्निर्वृत्तिर्वा भवति।

संसारप्रवृत्तिः निकायसभागान्तरेषु प्रतिसन्धिबन्धः।[2]

चतुर्भिः क्लेशैः मनो बद्धं वर्तते –

अविद्यां चात्मदृष्ट्या चास्मिमानेन तृष्णया।
एभिश्चतुर्भिः संक्लिष्टं मननालक्षणं मनः॥[3]

यदा आलयविज्ञानेन संसारस्य प्रवृत्तिर्भवति तदा तद् दौष्ठुल्यावस्थायां भवति अकर्मण्यावस्थायां भवति। बुद्धः सर्वेषामर्हत् भवति परं सर्वे अर्हतः बुद्धाः न भवन्ति।

"क्लेशावरणप्रहाणात् श्रावकाणां विमुक्तिकायः"[4]

बुद्धः धर्मकायाः भवन्ति

स एव आश्रयपरावृत्तिलक्षणां धर्माख्योऽपि उच्यते,
महामुनेर्भूमिपारमितादिभावनयाक्लेश-
ज्ञेयावरणप्रहाणात्।[5]

## बोधिचित्तोत्पादस्यावश्यकता

चित्तं संसारोन्मुखं प्रवाहसमं वहति, तद् यदि बोधिचित्ते परिणतं स्यात्तदा यदा यावत् संसारेण सम्बद्धो भवति। तदा यावत् लोकोपकारके कर्मणि रतः सत् चर्यां विद्धाति तथा यदाऽस्य पूर्णविकासो भवति तदा तदैव तस्य बुद्धता वर्तते। अतः गण्डव्यूहसूत्रे इदं सर्वबुद्धधर्माणां बीजं वर्तते।

"बोधिचित्तं हि कुलपुत्र बीजभूतं सर्वबुद्धधर्माणाम्"।[1]

सांसारिक स्वार्थस्य उपरि भूत सत्यदर्शनेन यदा क्लेशमिथ्यादृष्टिः तथा संयोजनानि (रागप्रधानबन्धाः) निरुणाद्धि भवन्ति, तदा अर्हत्वस्य प्राप्तिर्भवति। -

"श्रद्धया पश्यति चतुरार्यसत्यानि, निरुणाद्धि क्लेशान् मिथ्यादृष्टि संयोजनानि, प्राप्नोत्यर्हत्त्वम्।"[2]

चत्वारो ब्रह्मविहाराणां षड्पारमितानामनुसरणात् बुद्धतायाः प्राप्तिः भवति।

"श्रद्धया चरति चतुरो ब्रह्मविहारान् षट् पारमिताः, प्राप्नोत्यनुत्तरां सम्यक्संबोधिम्।"[3]

## बोधिचित्तोत्पादस्यावस्था

आदिबोधिचित्तं प्राणिनां हितकामनया उत्पद्यते। बोधिचित्तोत्पादसूत्रशास्त्रे आचार्यो वसुबन्धुः आदिबोधिचित्तस्य वर्णनावसरे

"बुद्धात्मजा बोधिसत्त्वा आदिबोधिचित्तमुत्पादयन्ति। तथाहि। महासमुद्रो यदादौ समुदेति ज्ञातव्यः सोऽधममध्यमोत्तममूल्यानाम्, यावदमूल्यानां चिन्तामणिरत्नमुवताफलानाम् आकरो भवति। एषां रतनानां महासमुद्राद् उत्पतेः। बोधिसत्त्वस्य चित्तोत्पादा अप्येवम्। यदादि चित्तमुत्पद्यते ज्ञातव्यं तद्देवमनुष्याणां श्रावक प्रत्यैकबुद्धबोधिसत्त्वानां सर्वकुशलधर्माणां ध्यानस्य प्रज्ञायाश्चोत्पत्तेकरः।"[4]

पुनस्तथाहि त्रिसहस्रमहासहस्रो लोकधातुर्यदा समुदेति ज्ञातव्यं तत्र ये पंचविंशतिर्भवएतेषु यावन्तः सत्वाः सर्वान् वहति सर्वेषामाश्रयो भवत्यावासो भवति। बोधिसत्त्वस्य चित्तोत्पादा अप्येवम्। यद समुदेति सर्वेषामाश्रयो भव्यप्रमेयाणां सत्वनाम्। षड्गतिषु चतुर्योमिषु ये सम्यग् मिथ्यादृष्ट्योऽभ्यक्तकुशलाभ्यावताकुशलारक्षितशुद्धशीलकृ तचतुर्गुरुपाराजिकाः सत्कृतरत्नत्रय निन्दितसद्धर्माः समलास्तेर्थिकाः श्रमणब्राह्मणाः क्षत्रिय – ब्राह्मण – वैश्य –

शूद्रास् तान् सर्वान् वहति सर्वेषामाश्रयो भवत्यावासो भवति। जनाः एतद् प्रकारेण् विचारयिष्यन्ति

मयान्यददुःखं हन्तव्यं दुःखत्वादात्मदुःखवत्।
अनुग्राह्यो मयान्येपि सत्त्वाद् आत्मसत्त्ववत्॥1

तत्वज्ञाः एवम्प्रकारकं चित्तोत्पादं परात्मसमता नाम्नाभिभाषन्ते। यस्य मुख्यतत्वमिदमेव वर्तते यथाहं वर्ते तथैव अन्यानपि वर्तयामि

परमात्मसमतामादौ भावयेदेवनादरात्। समदुःख सुखाः सर्वे पालनीया मयात्मवत्॥2

परमात्मसमताया अभ्यासात् दाधकाः यथा यथा वर्धते तथा तथा तस्य चित्तोत्पादः गंभीरा भवति। स आत्मत्वं सर्वथा सर्वेषु आरोपयति। परमात्मवत् निर्माति अयं च बृहत्तमः चित्तोत्पादः। अवस्थायामस्यां प्राप्य साधकः सर्वथा निरहङ्कारो भवति। तत्वज्ञाः एवम्प्रकारकं चित्तोत्पादं परात्मनिवर्तननाम्ना व्यवक्ष्यन्ते।

यथात्मबुद्धिरभ्यासात् स्वकायेस्मिन् निरात्मके।
परेष्वपि तथात्मत्वं किमभ्यासान्न जायते॥
एवं परार्थ कृत्वापि न मदो न च विस्मयः।
आत्मानं भोजयित्यैव फलाशा न च जायते॥3

यथा नैमशरीरे अभ्यासात् स्वस्य बोधो बवति तथैव द्वितीयेपि अभ्यासात् स्वस्य बोधो न सम्भवति इत्येवम्प्रकारेण परार्थमाश्रित्य न गौरवानुभूतिर्भवति न हि विस्मयः।

न नाम साध्यं बुद्धत्वं संसारेपि कुतः सुखं।
स्वसुखस्यान्यदुःखेन परिवर्तमकुर्वतः।।4

इयं परात्मपरिनिवर्तना लोकविषयक रक्षाया भावना वर्तते। लोकविषयक करुणाया भावना वर्तते, परजनं बन्धुवदाहृत्य दुःखानां शमनस्य भावना वर्तते।

**निष्कर्षः**

सत्त्वेषु बुद्धस्य स श्रेष्ठोंशो विद्यमानो भवति येन बुद्धस्य गुणानसमुदयो भवति

"बुद्धधर्मोदयांशस्तु श्रेष्ठः सत्त्वेषु विद्यते।"1

अशयोऽयं वर्तते यत् प्राणिषु येषु मनुष्यचेतनानां विकासो भवति तेषु बुद्धरूपवृक्षस्य बीजो वेर्तते। यथा बीजावपनेन साकं सिञ्चनादिभिः क्रियाभिः बीजः वृक्षरूपे विकसितो भवति तथैव बोधिचित्तरूपस्य बीजस्य ब्रह्मविहारेण पारमितया यदा विकासो भवति तदा स बुद्धो भवति। बीजे बीजादुत्पन्ने च वृक्षे यथा भेदो भवति तथैव आदिबोधिचित्ते तथा पूर्णविकसिते बोधिचत्ते भवति।

**संदर्भ**


1. अभिधर्मकोशः : सम्पादनम् - राहुलसांकृत्यायनः, प्रकाशनम् - ज्ञानमण्डल-काशीतः संस्करणम् -१९८४ वि.।
2. धम्मपदम् : सम्पादनम् – छिमेजरिंगजिन्लामा, प्रकाशकः – केन्द्रीय-उच्चतिब्बतीशिक्षा संस्थानं वाराणसी, संस्करणम् - १९७२ ई.।
3. धम्मपदम् (बुद्धोपदेशसंग्रहः): सम्पादकः– स्वामिद्वारिकादासशास्त्री विद्यासागरः प्रकाशनम्– चौखम्बासंस्कृतसीरीजः, वाराणसी, संस्करणम्- प्रथमम् २००५। बोधिचित्तोपादसूत्रशास्त्र
4. बोधिचर्यावतार:
5. लेखकः-शान्तिदेवः, सिरीजः- बौद्ध-संस्कृत-ग्रन्थावली प्रकाशनं – मिथिलाविद्यापीठः।
6. बोधिचर्यावतारः लेखकः आचार्यशान्तिदेवः , अनुवादकः- आचार्यशान्तिभिक्षुशास्त्री प्रकाशनम् - राष्ट्रीसंस्कृतसंस्थानम् , नवदेहली।
7. बौद्ध-दर्शन-मीमांसा: लेखकः– आचार्यबलदेव उपाध्यायः, प्रकाशनम्– चौखम्बाविद्याभवनम्, वाराणसी, संस्करणम् -१९७८।
8. बौद्धधर्मदर्शनम् : लेखकः – आचार्यनरेन्द्रदेवः , प्रकाशनम्-विहारराष्ट्रभाषापरिषद् , पटनसंस्करणम्- १९७१ ई.।
9. शिक्षासमुच्चयः सम्पादनम् – सिसिलवेण्डेलः,प्रकाशनम् – मौटन एण्ड क० एस्० ग्रेवेन्हगे , ग्रेटब्रिटेन, संस्करणम् - १०९५७ ई. ।
10. शिक्षासमुच्चयः : लेखकः – शान्तिदेवः , सीरीज - बौद्धसंसस्कृतग्रन्थावली- प्रकाशनम् –मिथिलाविद्यापीठप्रधानम्